प्रत्यंगरभसावेशप्रमदाप्राणवल्लभः ।
रासोल्लासमदोन्मत्तो राधिकारतिलंपटः ॥३३॥
खेलालीलापरिश्रांतः स्वेदांकुरचिताननः ।
गोपिकांकलसच्छ्रीमान्मलयानिलसेवितः ॥३४॥
इत्येवं प्राणनाथस्य प्रेमामृतरसायनम् ।
यः पठेच्छ्रावयेद्वापि स प्रेम्णि प्रमिलेद्ध्रुवम् ॥३५॥

इति श्रीवल्लभाचार्यविरचितं प्रेमामृतं संपूर्णम् ।

## अथ श्रीनंदकुमाराष्टकम् ।

श्रीकृष्णाय नमः ।

सुंदरगोपालम् उरवनमालं[1] नयनविशालं दुःखहरं ।
वृंदावनचंद्रमानंदकंदं परमानंदं धरणिधरम् ॥
वल्लभघनश्यामं[2] पूर्णकामम्[3] अत्यभिरामं प्रीतिकरं[4] ।
भजनंदकुमारं सर्वसुखसारं तत्त्वविचारं ब्रह्मपरम् ॥१॥

सुंदरवारिजवदनं निर्जितमदनम् आनंदसदनं मुकुटधरं ।
गुंजाकृतिहारं विपिनविहारं परमोदारं चीरहरम् ।
वल्लभपटपीतं कृतउपवीतं करनवनीतं विबुधवरं ।
भज नंदकुमारं सर्वसुखसारं तत्त्वविचारं ब्रह्म परम् ॥२॥

१ उरूवन. २ घनशोभंपू. ३ पूर्णमुकामम्. ४ इति पा० ममप्रीतिमाति.

शोभितसुखमूलं यमुनाकूलं निपटअतूलं सुखदवरं ।
मुखमंडितरेणुं चारितधेनुं वादितवेणुं मधुरसुरम् ।
वल्लभमतिविमलं शुभपदकमलं
नखरुचिविमलं तिमिरहरं ।
भज नंदकुमारं सर्वसुखसारं तत्त्वविचारं ब्रह्मपरम् ॥३॥
शिरमुकुटसुदेशं कुंचितकेशं नटवरवेषं कामवरं ।
मायाकृतमनुजं हलधरसहजं प्रतिहतदनुजं भारहरं ।
वल्लभव्रजपालं सुभगसुचालं हितमनुकालं भाववरं ।
भज नंदकुमारं सर्वसुखसारं तत्त्वविचारं ब्रह्मपरम् ॥४॥
इंदीवरभासं प्रकटसुरासं कुसुमविकासं वंशिधरं ।
हितमन्मथमानं रूपनिधानं कृतकलिगानं चित्तहरम् ।
वल्लभमृदुहासं कुंजनिवासं विविधविलासं केलिकरं ।
भज नंदकुमारं सर्वसुखसारं तत्त्वविचारं ब्रह्मपरम् ॥५॥
अतिपरमप्रवीणं पालितदीनं भक्ताधीनं कर्मकरं ।
मोहनमतिधीरं कणिवॅलिवारं हतपतवीरं तरलतरम् ।
वल्लभव्रजरमणं वारिजवदनं जलधरशमनं शैलधरं ।
भज नंदकुमारं सर्वसुखसारं तत्त्वविचारं ब्रह्मपरम् ॥६॥
जलधररुचिकायं ललितत्रिभंगं बहुकृतिरंगं रसिकवरं ।
गोकुलपरिवारं मदनाकारं कुंजविहारं गूढनरम् ।

१ वल्लभपीतपटं. २ कृतसंवीतं. ३ निरुपमशीलं. ४ वंशधर इति पा० ममप्रतिभाति. ५ कलिचलिवारं. अथवा चलिकलिचारं-

वल्लभव्रजचन्द्रं सुभगसुच्छंदं परमानंदं भ्रांतिहरं ।
भज नंदकुवरं सर्वसुखसारं तत्त्वविचारं ब्रह्मपरम् ॥७॥
वंदितचरणयुगं पावनकरणं जगदुद्धरणं विमलधरं[1] ।
कालियशिरगमनं कृतफणिनमनं
घातितयमनं[2] मृदुलतरम् ।
वल्लभदुःखहरं निर्मलचरणम् अशरणशरणं मुक्तिकरं ।
भज नंदकुमारं सर्वसुखसारं तत्त्वविचारं ब्रह्मपरम् ॥८॥
इति श्रीवल्लभाचार्यविरचितं श्रीनंदकुमाराष्टकं संपूर्णम् ।

# अथ श्रीगिरिराजधार्यष्टकम् ।

श्रीगोपीजनवल्लभाय नमः ।

भक्ताभिलाषाचरितानुसारी
दुग्धादिचौर्येण यशोविसारी ।
कुमारतानंदित घोषनारिर्मम प्रभुः
श्रीगिरिराजधारी ॥१॥
व्रजांगनावृंदसदाविहारी अंगैर्गुहांगारतमोपहारी ।
क्रीडारसावेशतमोभिसारी मम प्रभुः
श्रीगिरिराजधारी ॥२॥
वेणुस्वनानंदितपन्नगारी । रसातलानृत्यपदप्रचारी ॥

१ विमलकरं. २ घातितयमुनं इति पा० मन्प्रतिभाति.